मुमुक्षुभिः परित्यागो वैराग्यं फल्गु कथ्यते ॥”
इति भक्तिरसामृतसिन्धौ पूर्व्वभागे साधनलहरी ॥

वैराटः, पुं, इन्द्रगोपकीटः । इति हेमचन्द्रः ॥ विराटसम्बन्धिनि, त्रि । ( क्ली, विराटपर्व्व । यथा, महाभारते । १ । २ । ५७ ।
“आरण्येयन्ततः पर्व्व वैराटन्तदनन्तरम् ॥”
विराटकन्यायां स्त्री । यथा, तत्रैव । १।२।५८ ।
“अभिमन्योश्च वैराट्या पर्व्व वैवाहिकं स्मृतम् ॥”
तथा च देवीभागवते । २ । ७ । ४ ।
“अभिमन्योर्वरा भार्य्या वैराटी चातिसुन्दरी ॥”
विस्तृते च त्रि । यथा, महाभारते ।१३।७६।२१।
“वैराटपृष्ठसुभगां सर्व्वरत्नैरलङ्कृताम् ।
प्रदाय महतां लोकान् स राजन् प्रतिपद्यते ॥”)

वैराट्या, स्त्री, जिनषोड़शविद्यादेव्यन्तर्गतदेवीविशेषः । इति हेमचन्द्रः ॥

वैरातङ्कः, पुं, अर्ज्जुनवृक्षः । इति राजनिर्घण्टः ॥

वैरी, [न्] पुं, (वैरमस्यास्तीति । इनिः ।) शत्रुः । इत्यमरः ॥ ( यथा, मनौ । ४ । १३३ ।
“वैरिणं नोपसेवेत सहायञ्चैव वैरिणः ॥”)
वीरसम्बन्धिनि, त्रि ॥

वैरूप्यं, क्ली, ( विरूपस्य भावः । ) विरूपता । यथा,—
“वैरूप्यमङ्गेषु कशानिपातो
मौण्ड्यं तथा लक्ष्मणसन्निवेशः ।
एतान् वधानर्हति रूक्षवादी
प्राज्ञेषु दूतस्य वधो न दृष्टः ॥”
इति महानाटके ५ अङ्कः ॥
( असाधारणत्वम् । यथा, महाभारते । ५ । ४३ । ७ ।
“निर्द्दिश्य सम्यक् प्रवदन्ति वेदा-
स्तं विश्ववैरूप्यमुदाहरन्ति ॥”
विसदृशत्वम् । यथा, तत्रैव । १२ । २४० । २ ।
“एतच्चान्योन्यवैरूप्यं वर्त्तते प्रतिकूलतः ॥”)

वैरोचनः, पुं, ( विरोचनस्यापत्यम् । विरोचन + अण् । ) बुद्धः । बलिराजः । ( यथा, महाभारते । ३ । ९८ । १७ ।
“अथ वैरोचने दोषानिमान् विद्वान्समावताम् ॥”)
अग्निपुत्रः । सूर्य्यपुत्रः । सिद्धगणः । इति शब्दरत्नावली ॥

वैरोचननिकेतनं, क्ली, ( वैरोचनस्य बलेर्निकेतनम् । ) पातालम् । इति हलायुधः ॥

वैरोचनिः, पुं, (विरोचनस्यापत्यम् । विरोचन + इञ् । ) बुद्धः । बलिराजः । ( यथा, विष्णुपादादिकेशवर्णनस्तोत्रे । १ ।
“याभ्यां वैरोचनीन्द्रौ युगपदपि विपत्सम्पदोरेकधाम ॥”)
सूर्य्यपुत्रः । इति मेदिनी ॥

वैरोचिः, पुं, बाणदैत्यः । यथा । वैरोचिर्बलिनन्दनः । इति शब्दरत्नावली ॥

वैरोद्धारः, पुं, ( वैरस्योद्धारः । ) कृतापकारस्य प्रत्यपकारः । यथा,—
“प्रतिकारः प्रतीकारो वैरनिर्यातनं तथा ।
निर्यातनं वैरशुद्धिर्वैरोद्धारो निगद्यते ॥”
इति शब्दरत्नावली ॥

वैलक्षण्यं, क्ली, ( विलक्षणस्य भावः । विलक्षण + ष्यञ् । ) विलक्षणत्वम् । विलक्षणस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् । ( यथा, भागवते । १० । ५५ । २६ ।
“अवधार्य्य शनैरीषद्वैलक्षण्येन योषितः ॥”
विभिन्नत्वम् । यथा, मनौ कुल्लूकः । १ । ८५ ।
“त्रेतादिष्वपि युगापचाररूपेण धर्म्मवैलक्षण्यम् ॥” )

वैल्वं, क्ली, ( बिल्वस्येदम् । अण् । ) बिल्वफलम् । इत्यमरटीका ॥ बिल्वसम्बन्धिनि, त्रि ॥ ( यथा, मनौ । २ । ४५ ।
“ब्राह्मणो वैल्वपालाशौ क्षत्त्रियो वाटखादिरौ ॥”)

वैवधिकः, त्रि, ( विवधेन धान्यतण्डुलादिना व्यवहरति । “विभाषा विवधवीवधात् ।” ४ । ४ । १७ । इति ठक् । ) विवधेन धान्यतण्डुलादिना व्यवहरति यः । पसारि इति भाषा । ( यथा, राजतरङ्गिण्याम् । ६ । ३०८ ।
“वल्गाभिधा वैवधिकी वल्गामठमकारयत् ॥”)
तत्पर्य्यायः । वार्त्तावहः २ । इत्यमरभरतौ ॥ वार्त्तोवहः ३ । इति शब्दरत्नावली ॥

वैवर्ण्यं, क्ली, ) विवर्णस्य भावः । ) विवर्णता । विवर्णस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् ॥ ( यथा, कथासरित्सागरे ।१६।६८।
“सा वार्त्ता कर्णमागत्य तस्या वैवर्ण्यदायिनी ॥”
तत्तु स्त्रीणां सात्त्विकभावानामन्यतमम् । यथा, साहित्यदर्पणे । ३ । १६६ ।
“स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥”)

वैवस्वतः, पुं, (विवस्वतोऽपत्यमिति । अण् ।) यमः । इत्यमरः ॥ (यथा, बृहत्संहितायाम् ।६८।२३।
“एवं शशः सप्ततिहायनोऽयं
वैवस्वतस्यालयमभ्युपैति ॥”
यथा च ऋग्वेदे । १० । १४ । १ ।
“वैवस्वतं संगमनं जनानां
यमं राजानं हविषा दुवस्य ॥”
“वैवस्वतं विवस्वतः सूर्य्यस्य पुत्त्रम् ।”इति तद्भाष्ये सायणः ॥ यथा च राजतरङ्गिण्याम् । ४ । ५५१ ।
“वनराजिश्यामलेन दिशं वैवस्वताङ्किताम् ॥”)
रुद्रविशेषः । इति जटाधरः ॥ शनिः । सप्तमो मनुः । (यथा, रघुवंशे । १ । ११ ।
“वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ॥”)
वर्त्तमानोऽयम् । अस्मिन्मन्वन्तरे वामनोऽवतारः । पुरन्दरः इन्द्रः । आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः । अश्विनावृभवः । इत्याद्या देवाः । कश्यपः अत्रिः वशिष्ठः विश्वामित्रः गौतमः जमदग्निः भरद्वाजः एते सप्तर्षयः । इक्ष्वाकुः नृगः शर्य्यातिः दिष्टः धृष्टः करूषकः नरिष्यन्तः पृषध्रः नाभागः कविः एते मनुपुत्त्रा दश । इति श्रीभागवतमतम् ॥ * ॥ अपि च ।
“सप्तमञ्च प्रवक्ष्यामि यद्वैवस्वतमुच्यते ।
अत्रिश्चैव वशिष्ठश्च कश्यपो गौतमस्तथा ॥
भरद्वाजस्तथा योगी विश्वामित्रः प्रतापवान् ।
जमदग्निश्च सप्तैते सांप्रतं ये महर्षयः ॥
साध्या विश्वाश्च रुद्राश्च मरुतो वसवोऽश्विनौ ।
आदित्याश्च सुरास्तद्वत् सप्त देवगणाः स्मृताः ॥
इक्ष्वाकुप्रमुखाश्चास्य दशपुत्त्राः स्मृता भुवि ।
मन्वन्तरेषु सर्व्वेषु सप्त सप्त महर्षयः ॥
कृत्वा धर्म्मव्यवस्थानं प्रयान्ति परमं पदम् ॥”
इति मात्स्ये मन्वन्तरानुकीर्त्तनो नाम ९ अः ॥ अन्यच्च ।

श्रीमार्कण्डेय उवाच ।
“आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः ।
भृगवोऽङ्गिरसश्चाष्टौ यत्र देवगणाः स्मृताः ॥
आदित्या वसवो रुद्रा विज्ञेयाः कश्यपात्मजाः ।
साध्याश्च मरुतो विश्वे धर्म्मपुत्त्रा गणास्त्रयः ॥
भृगोस्तु भृगवः पुत्त्राः ह्यङ्गिरोऽङ्गिरसः सुताः ।
एष सर्गस्तु मारीचो विज्ञेयः सांप्रताधिपः ॥
तेजस्वी नाम चेन्द्रोऽपि महात्मा यज्ञभागभुक् ।
अतीतानागता ये च वर्त्तन्ते ये च सांप्रतम् ॥
सर्व्वे ते त्रिदशेन्द्रास्तु विज्ञेयास्तुल्यलक्षणाः ।
सहस्राक्षाः कुलिशिनः सर्व्व एव पुरन्दराः ॥
मघवन्तो वृषाः सर्व्वे शृङ्गिणो गजगामिनः ।
ते शतक्रतवः सर्व्वे भूताभिभवतेजसः ॥
धर्म्माद्यैः कारणैरेतैराधिपत्यगुणान्विताः ।
भूतभव्यभवन्नाथाः शृणु चैतत् त्रयं द्विज ॥
भूर्लोकोऽयं स्मृतो भूमिरन्तरीक्षं भुवः स्मृतम् ।
स्वराख्यञ्च तथा स्वर्गस्त्रैलोक्यमिति गद्यते ॥
अत्रिश्चैव वशिष्ठश्च कश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रश्च कौशिकः ॥
तथैव पुत्त्रो भगवानृचीकस्य महात्मनः ।
जमदग्निश्च सप्तैते मुनयोऽत्र तथान्तरे ॥
इक्ष्वाकुर्नभगश्चैव धृष्टः शर्य्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभागो दिष्ट एव च ॥
करूषश्च पृषध्रश्च भूमिपा लोकविश्रुताः ।
मनोर्व्वैवस्वतस्यैते नव पुत्त्राः प्रकीर्त्तिताः ॥
वैवस्वतमिदं देवि ! कथितं ते मयान्तरम् ।
अस्मिन् श्रुते नरः सद्यः पठिते चैव सत्तम ।
मुच्यते पातकैः सर्व्वैः पुण्यञ्च महदश्नुते ॥”
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरं समाप्तम् ॥

वैवस्वती, स्त्री, ( वैवस्वतस्य इयम् । अण् । ततो ङीप् । ) दक्षिणदिशा । इति राजनिर्घण्टः ॥

वैवाहिकः, पुं, (विवाहादागतः । विवाह + ठञ् ।) कन्यापुत्त्रयोः श्वशुरः । वेयाइ इति बङ्गभाषा ॥ समधी इति हिन्दीभाषा । (तत्पर्य्यायः । सम्बन्धी २ ॥ यथा, कौतुकसर्व्वस्वे । १ ।